


# চলমান জীবন জিজ্ঞাসা :
## বিবিধ প্রসঙ্গ

সম্পাদনা

ড. পিন্টু রায়চৌধুরী

CamScanner

# চলমান জীবন-জিজ্ঞাসা:
# বিবিধ প্রসঙ্গ

## (প্রথম পর্ব)

সম্পাদনা

**পিন্টু রায়চৌধুরী**

অক্ষরযাত্রা

*Chalaman Jiban-Jiggasa: Bibidha Prasanga*
Edited by Pintu Roychoudhury

© মুগবেড়িয়া গঙ্গাধর মহাবিদ্যালয়

প্রথম প্রকাশ
সেপ্টেম্বর, ২০২২

ISBN: 978-93-93534-11-8

প্রকাশক
অক্ষরযাত্রা প্রকাশন
আনন্দগোপাল হালদার
৭২ দেবাইপুকুর রোড, হিন্দমোটর, হুগলি ৭১২২৩৩
মোবাইল +৯১৯৪৭৪৯০৭৩০৭
ই-মেল: aksharyatrabook@gmail.com

বর্ণবিন্যাস
প্রিন্টম্যাক্স
ইছাপুর

প্রচ্ছদ
রোচিষ্ণু সান্যাল

বিনিময়
তিনশত পঁচাত্তর টাকা

# সূচিপত্র

## ভাষা ও সাহিত্য বিষয়ক ভাবনা


| | | |
|---|---|---|
| শামসুর রাহমান: সময় ও সমাজের কথাকার | শামস্ আল্‌দীন | ১৭ |
| সংস্কৃত ভাষার ঐতিহ্য, উপলব্ধি ও বাস্তবতা | জগন্নাথ মেইকাপ | ২৯ |
| সিকান্‌দার আবু জাফরের সিরাজ-উ-দ্দৌলা ও সাঈদ আহমদের শেষ নবাব নাটকে দেশীয় চেতনার তুলনামূলক বিশ্লেষণ | মো. আব্দুর রহমান | ৩৩ |
| আরেক ফাল্গুন: আন্দোলনে নারীর ভূমিকা | নাজিয়া ফেরদৌস | ৪৫ |
| নামকরণ সংস্কার ও বর্তমানে তার প্রভাব | সুতপা গিরি | ৫১ |
| সত্তর দশকের রাজনৈতিক প্রেক্ষাপট ও কবি বীরেন্দ্র চট্টোপাধ্যায়ের কবিতা | বিশ্বজিৎ সামন্ত | ৫৮ |
| Writing as a sword of creating an Identity: Sharankumar Limbale's 'Akkarmasi' | Deblina Acharyya | ৭৫ |
| The Floating World of Memory and Language: Constructing and Confronting the past in Kazuo Ishiguro's An Artist of the Floating world | Taniya Neogi | ৮২ |
| मन्थराचरित्रमन्थनम् | शम्भु-मान्ना | ৮৯ |
| न्यायनये शब्दशक्तिविमर्शः | डॉ. मनोरञ्जन दासः | ৯৩ |


## সমাজ-সংস্কার-শিক্ষা বিষয়ক ভাবনা


| | | |
|---|---|---|
| ভারতের আদিবাসী জনগোষ্ঠীর আর্থ-সামাজিক ও রাজনৈতিক সমস্যা এবং আন্দোলনসমূহ: একটি পর্যালোচনা | জ্যোতি মিত্র | ৯৭ |
| দেহোপজীবিনীর অবস্থান ও অধিকারের লড়াই: পশ্চিমবঙ্গের একটি স্বেচ্ছাসেবী সংগঠনের ভূমিকা | পিন্টু রায়চৌধুরী | ১১০ |
| বিয়ের গীত: নারীর প্রতি নারীর বৈরী মনোভাব | নাজিয়া ফেরদৌস | ১২৪ |
| ভারতীয় গণতন্ত্র ও মিডিয়ার ভূমিকা | সিদ্ধার্থ চ্যাটার্জী | ১২৯ |
| ভারত-বাংলাদেশ ছিটমহলে মহিলাদের অবস্থা ও মানবিধিকার কমিশনের প্রাসঙ্গিকতা (১৯৪৭-২০১৫) | সনাতন অধিকারী | ১৩৬ |
| ধর্মনিরপেক্ষতা ও সাম্প্রদায়িকতা | চন্দন নাড়ু | ১৪০ |


CamScanner

# मन्थराचरित्रमन्थनम्

## शम्भु-मान्ना

भारतवर्षस्य रमणीयसम्पद्भूतं भारतीयानां च अतीव श्रद्धास्पदं हि आदिकाव्यं रामायणम् आदिकवेः वाल्मीकेः। आदिकविना तस्य हृदयापूर्वमाधूर्य्या महाकाव्यमिदं वैचित्र्यपूर्णं कृतम्। रचनायां तस्य निसर्गप्रीतिः, सौन्दर्यपिपासा कल्पनाविलासभूतविषयाः यथा दृश्यन्ते तथैव वास्तविकबोधः सामाजिकचेतनमूलका च दृष्टिरपि। एतद्द्वयं पाठकानां रसधारायां सन्तुष्टिं विदधाति पुराधुनिकसाहित्येष्वन्तर्भवनं कृत्वा। न केवलं साधुचरित्राणाम्, असाधुचरित्राणामपि समावेशनं यस्मिन् कस्मिन्नपि काव्ये दृश्यते। एतेन साधुचरित्राणामौज्ज्वल्येनाधिकतया प्रतिभानं तथैव भवेत् यथा अन्धकारोपस्थित्या आलोकस्य गुरुत्वं प्रकाशितं भवति। एतादृशेषु चरित्रेष्वन्यतमा हि मन्थरा।

अत्र मन्थराचरित्रस्य दिग्द्वयमाश्रित्य मम आलोचना करणीया अस्ति। तत्र एका दिक् खलु रामस्य वनवासं प्रति मन्थरायाः दोषास्पदत्वमस्ति न वेति विमर्शः। अपरा च काव्ये अस्मिन् मन्थराचरित्रसन्निवेशने किं माहात्म्यम् । आदौ प्रथमपक्षमाश्रित्य आलोचनम्। मन्थरायाः चरित्रविषये आलोचनात् पूर्वं तस्याः संस्तवः अवश्यमेव ज्ञातव्यः। सा अश्वपतेः कन्यायाः कैकेय्याः दासीरूपेण नियुक्ता आसीत्। अत्र मन्थरायाः नामोच्चारणेनैव कैकेय्याः अपि नाम आगच्छति यतः मन्थराः आसीत् दासी कैकेय्याः। कैकेयी च राज्ञः दशरथस्य तृतीया पत्नी।

अयोध्याकाण्डे रामस्य राज्याभिषेकरूपसंवादमाकर्ण्य नानाविधतया कैकेयीमुद्दिश्य मण्त्रणारूपकार्यप्रदाने यत्नवती भवति मन्थरा कैकेय्याः तनयः भरतः यथा राजा भवेदित्यर्थम्। प्राथमिकतया कैकेय्या असम्मतः भूत्वा रामचन्द्रस्य प्रशंसा कृता। तथाहि कैकेय्या उक्तम्-

"तां दृष्ट्वा परमप्रीतां ब्रुवन्तीं मन्थरां ततः।
रामस्यैव गुणान् देवी कैकेयी प्रशशंस ह।।
धर्मज्ञो गुरुभिर्दान्तः कृतज्ञः सत्यवाक्छुचिः।
रामो राज्ञः सुतो ज्येष्ठो यौवराज्यमतः अर्हति।।
......................................................
राज्यं यदि हि रामस्य भरतस्यापि तत्तथा।
मन्यते हि यथात्मानं तथा भ्रातृंस्तु राघवः।।"[1] इत्यादिना।

एतेन मन्थरा क्रुद्धा सती नानारूपमन्त्रणोपस्थापनद्वारा अन्तिमे तयैव कैकेयी प्रभाविता कृता। कारणादेतस्मात् दशरथस्य सकाशे कैकेयी रामस्य वनगमनार्थं मानसिकदृढतां पुपोष। रामस्य च वनगमनं निश्चितं भवति। उपर्युक्तया अमुया घटनया रामस्य वनगमनं प्रति मन्थरायाः कोऽपि दोषोऽस्ति न वा । विषये अस्मिन् सपक्षविपक्षयुक्त्या समस्यायाः अस्याः समाधानं कर्तुमहं चेष्टे। आदौ वयं कार्ये अस्मिन् मन्थरायाः षड्भिः कारणैः अदोषपदत्वं वक्ष्यामः। अत्र निम्ने कारणानि मया उल्लिख्यन्ते क्रमिकतया।

प्रथमतः- एतादृशः खलु स्वभावः मन्थरायाः अन्यानुद्दिश्य कुमन्त्रणाप्रदाने। तस्याः कर्म तयैव कृतम्। किन्तु कैकेयी एका राजमाता भूत्वा कथमेकस्याः अज्ञानोपेतसाधारणनार्य्याः वाक्यं श्रुतवती। एतेन मन्थरायाः कोऽपि दोषो नास्ति।



CamScanner

द्वितीयतः- परामर्शदात्रीतया तया मन्थरया कैकेयीमुद्दिश्य परामर्शदानं कृतम्। किन्तु तत्परामर्शस्य ग्रहणं कर्तव्यमकर्तव्यं वा तस्य विचारः तयैव कैकेय्या कर्तव्यः। लोकचरित्रापन्नस्याभिज्ञजनस्य निश्चयेन ज्ञानमस्ति यत् दुर्बलतायाः विजयार्थं सुतरामेव स्थातव्या मानसिकी दृढता। कैकेयीचरित्रे ऐकान्तिकतया आसीत् तदभावः। साधारणतया सा सामान्या उदारचित्तप्रकृतिसम्पन्ना। एतेन मन्थरायाः दोषत्वं न जायते परन्तु कैकेय्याः स्वचरित्रबलात् तस्या एव दोषत्वम्। रामस्य वनवासावसरे धैर्यहीनेन सुमन्त्रेण अतीव कर्कशवाक्येन भर्त्सना कृता कैकेयीमुद्दिश्य। तथाहि उक्तम्-

"अभिजातं हि ते मन्ये यथा मातुस्तथैव च।
न हि निम्बात् स्रवेत् क्षौद्रं लोके निगदितं वचः।।
तव मातुरसद्ग्राहं विद्मः पूर्वं यथा श्रुतम्।।"[२] इति

मातृदुर्संसिद्धेः कन्यायां कैकेय्यां आगमने मन्थरया कुमन्त्रणाद्वारा अनायासेनैव कैकेयी वशीभूता जाता। अतः मन्थरा न तु दोषयुक्ता।

तृतीयतः- मोहवशात् राज्ञा दशरथेन कैकेय्या उद्वाहकाले केकयराजस्याश्वपतेः सकाशे तस्यैव कन्यायाः पुत्रः राजा भविष्यतीति वचनप्रतिज्ञा कृता। किन्तु परस्मिन् काले रामं प्रति मोहवशात् राज्ञा दशरथेन तत्पूर्वकृतवचनं लङ्घितम्। तदानीन्तने समये प्रतिज्ञाबद्धवचनस्य भङ्गकरणे नियमः नासीदिति ज्ञायते रामायणात् परं महाभारतमहाकाव्यात्। किन्तु राज्ञा दशरथेन तत्कृतम्। अत्र मन्थरया तदधिकारप्राप्त्यर्थं कैकेय्याः मनसि तत्सचेतनता सूचिता। अतएव विचारे अस्मिन् नास्ति मन्थरायाः दोषत्वम्।

चतुर्थतः- दशरथः पूर्वस्मादेव रामाय राज्यं प्रदातुमिष्टवान्। तस्मात् हेतोः तेनैव दूरं प्रेरितः भरतः। प्रजावृन्दश्चापि तदिष्टवान्। सभामाहूय प्रजानामभिमतमादाय दशरथेन रामाय राजत्वं प्रदत्तम्। परन्तु प्रजाभिः साकं किमपि परामर्शनमकृत्वा तेन राज्ञा दशरथेन कैकेय्याः वाक्यं स्वीकृतम्। क्षणे अस्मिन् राज्ञा दशरथेन प्रजाः विस्मृताः। सः राजा भूत्वा भार्यायाः कैकेय्याः वचनं राद्धान्ततया तेनैव गृहीतं यत् तत्सकाशे अनुचितमेव कार्यम्। अतोऽस्मिन् कार्ये युक्त्यानया मन्थरायाः कैकेय्याः वा दोषत्वं नास्ति।

पञ्चमतः- वङ्गदेशीयेषु तथा उत्तरपश्चिमाञ्चलप्रदेशीयेषु बहुषु पुस्तकेषु दृश्यते यत् कैकेयी शापदोषेण मोहिता आसीत् ।[३] तस्मात् मन्थरावाक्ये तया कोऽपि दोषो न दृष्टः। बाल्यकाले पितृगृहे विरूपब्राह्मणमेकं प्रति कैकेय्या विद्वेषपोषणं कृतम्। तदर्थं तेन ब्राह्मणेन कैकेयीमुद्दिश्याभिशापवचनं प्रदत्तं यत् रूपमदमत्ता भूत्वा यतः तया ब्राह्मणं प्रति विद्वेषः कृतः तस्मात् साधारणाः जनाः ते तादृशतया असूयिष्यन्तीत्यवमभिशप्तत्वात् कैकेयी मन्थरया वशीभूता जाता। एतादृश्या घटनया मन्थरायाः कोऽपि दोषो न दृश्यते इति सूच्यते।

षष्ठतः- अध्यात्मरामायणे एवं दृश्यते यत् देवताभिः तस्मिन् समये सरस्वतीदेवीमाहूय उक्तं - रामस्य यौवराज्याभिषेकानुष्ठाने त्वं(सरस्वती)तत्र गत्वा विघ्नरूपकार्यं करिष्यसि। आदौ त्वं दास्याः मन्थरायाः परञ्च कैकेय्याः मनीषां विपरिणम्याभिषेकविघ्नञ्च निर्माय पुनः स्वर्गं प्रत्यागमिष्यसि। तथाहि अध्यात्मरामायणे दृश्यते –

"रामाभिषेकविघ्नार्थं यतस्व ब्रह्मवाक्यतः।
मन्थरां प्रविशस्वादौ कैकेयीं ततः परम्।।
ततो विघ्ने समुत्पन्ने पुनरेहि दिवं शुभे।
तथेत्युक्त्वा तथा चक्रे प्रविवेशाय मन्थराम्।।"[४] इति

तत्रैवान्यत्र ऋषिवामदेवेनाप्युक्तम् –

राजा व कैकेयी वापि नात्र कारणमण्वपि।
पूतवेद्धुर्नारदः प्राह भूभारहरणाय च।।[५] इति

अपि च वाल्मीकेः रामायणे अपि वनवासात् पूर्वं रामेण लक्षणमुद्दिश्य एवमेव वाक्यं भणितम्।

यथा -

यदचिन्त्यं तु तद्दैवं भूतेष्वपि न हन्यते।
व्यक्तं मयि च तस्यां च पतितो हि विपर्ययः।। इति

अतएवैतादृशतया कार्यमिदं दैवेन सम्भूतम्। तदर्थं नास्ति मन्थरायाः दोषत्वम्।

पुनश्च विपक्षपमवलम्ब्य वक्तुं शक्यते यत् अस्मिन् कार्ये मन्थरायाः दोषत्वं जायते। कारणं हि

-

प्रथमतः- मन्थरा आसीत् कैकेय्याः सेविका स्वदासी वा। अतः कैकेय्याः यत् साधु भवेत् तदेव तेन कर्तव्यम्। किमिति सा मन्थरा एतादृशकुमन्त्रणाद्वारा कैकेयीं विपदं पुरतः प्रेरितवती। एतेन मन्थरयासाधुकार्यं कैकेयीं प्रति कृतम्।

द्वितीयतः- मन्थरेष्टवती यदि कैकेयी राजमाता भवेत्तर्हि सा सुखेन दिनातिक्रमणं करिष्यति। अपि च सर्वविधोपकारकत्वस्यात्मीकर्तुं समर्था भविष्यति। अर्थात् स्वार्थसिद्ध्यर्थं मन्त्रणाद्वारा कैकेयीमस्मिन् कार्ये नियोजितवती मन्थरा। एतेन मन्थरायाः मनः दुश्चिन्ताग्रस्तमासीदिति स्पष्टम्।

अधुना अस्मिन् काव्ये मन्थराचरित्रसन्निवेशने किं माहात्म्यमिति द्वितीयभागमवलम्ब्य आलोचनम्। काव्यप्रयोजने विषयवस्तु च यथा त्वरान्वितं भवेत्तदर्थं बहुसमये कविना विभिन्नचरित्राणां सन्निवेशनं कृतम्। महाकविना वाल्मीकिना तस्य काव्ये रामायणे एतादृशस्य मन्थरानामचरित्रस्य संयोजनं कृतम्। चरित्रस्यास्यानुप्रवेशात् ये विषयाः प्रस्फुटिताः ताः निम्ने मया उल्लिख्यन्ते-

प्रथमतः- एतच्चरित्रसन्निवेशने महाकाव्यस्य विस्तार्यं बहुलांशे सम्भवेदिति तु प्रथमकथनम्।

द्वितीयतः- जगत्यस्मिन् वयमुत्तमगुणस्य गुरुत्वं बोद्धुमसमर्था असाधुगुणं विना। तस्मान्मन्थराचरित्रेण रामस्य चरित्रमधिकतया ओज्ज्वलं प्रतिभाति।

तृतीयतः- मन्थरायाः कुमन्त्रणया रामस्य वनगमनं वनवाससमये च राक्षसराजरावणेन सीताहरणं कृतम्। रामेण सीतायाः पुनरुद्धारणं रावणस्य च निधनं सम्पन्नं जातम्। एतेन समाजस्य कल्याणं साधितम्। किन्तु अस्मिन् चरित्राभावे एतदसम्पादितं भवेत्।

अन्ततो गत्वा एवं वक्तुं शक्यते यत् साधारणदृष्ट्या मन्थरा दोषास्पदभूता सत्यपि प्रकृततया सा उपर्युक्तैः कारणैः पूजिता। भरद्वाजमुनेः आश्रमे रामस्य वनगमनार्थं भरतः तस्य मातरमतीव कर्कशवाक्येन तिरस्कारसमये मुनिनाप्युक्तम्-

"देवानां दानवानां च ऋषीणां भावितात्मनाम्।
हितमेव भविष्यद्धि रामप्रवाजनादिह।।"[६] इति शम्।